# पाप विमोचन स्तोत्रम्

सुकृतं तिलमात्रतुल्यमीश क्रियते नैव मकवत्सरेऽपि |
अपि तु क्रियते हि सदाघसोंगः प्रतियामं सकलेंद्रिय्कैर्मुकुंद || 1 ||
न शिरश्चलतीश मे कदापि श्रुतिजानंदभरेण सद्गुणानां |
अपि तु प्रभु-बंधु-दुर्गुणानां श्रवणार्थं चलितं भवत्यशंकं ॥ 2 ॥

श्रवणे श्रवणाय सत्कथाया न यतेते तव पुण्यकीर्तनस्य |
अपि तु व्यभिचारलोकवार्ता श्रवणाय्कव महादरं प्रतातः || 3 ||

न ममाक्षियुगं प्रवर्तते श्रीभगवच्चासाकुलावलोकनाय |
अपि तु ध्रुवबाल नर्तकीनां गणिकानां परिनर्तनादिद्रष्टे || 4 ||
न हि नासिकया कदापि विष्टो पदपद्मार्पितपुष्पगंधबुद्धिः |
कमलेश भवामि किंतु विष्टोश्चरणानर्पित पुष्पगंधबुद्धिः || 5 ||
बृहरेच्युत माधवेश कृष्ण हरिगोविंद मुकुंदनामजातं |
न हि कीर्तय तीह मे कुजिह्वापि तु दुर्लिंगभगांकितानुशब्दान् || 6 ||
तव गेहवरावलेपनादिं न करौ मे कुरुतः कदापि भक्ता |
अपि तूरुगुणार्ण दुष्टवस्तुग्रहणाय्कैव मुकुंद किं तु कुर्मः ||7||
उदरं मम धिक् शठस्य विष्णर्पित पूतान्न विवर्जितं नितांतं |
यदपूततरा समर्पणीयाधमवृंताकपलांडु पूर्वभाजः ||8||

खलजारवधूगृहाणि नित्यं चरणाभ्यामनुयाम्यहं त्वराभ्यां |
न तु माधव तावकालयांश्च प्रतियामीश महत्तमाग्र होअहं || 9 ||
मन एव हरेखिलेंद्रियाणां वरमित्थं प्रमितं श्रुतिस्मृतिभ्याम् |
सुमनोजयिनो अखिलेंद्रियाणां जय एवेति जनानुभूतिरस्ति ॥10 ||
मनसाच्युत कृष्ण तादृशेनाप्यनुचिंव भवंतमात्मभक्तान् |
भववारिनिधेः सुतारयंतं भववार्धिं न हि तर्तुमस्ति यत्नः ॥ 11 ॥
मम पापचयस्य वासुदेवांतकलोकस्थितिरेव चेत्सलं तु |
न सुखी सदृशोस्ति मे त्रिलोक्यां फलभावेन महत्तमोऽस्ति सिद्धं ॥2॥
न सुखानुभवाय पापकर्माण्यहमीशानुदिनं तनोमि किंतु |
अघनाशयशः परीक्षणार्थं तव नाम्नामनुतापसिद्द येवा ॥ 13 ॥
निजवासरुषा प्रदातुमार्तिं हैधिकां पापनियामकासुरेभ्यः |
अशुभान्यपि कारयन्मया त्वं रमसे सर्वनियामकेति विभासि || 14 ||
यदि कृष्ण कदाचनापि पुण्यं घटते पापमयस्य मेऽपि तत्तु |
प्रबलाघचय्कैर्विहन्यते वा दुरितध्वंस कृतार्थमीश स्यात्॥15॥
तदिहोभयतश्च पुण्यमूर्ते सुकृतं नो घटते मानागपीश |
वद मे पुरतव भीरोर्भगवन्कालभयापहतृपायo || 16 ||
अतुलं नृषु वैष्णवं सुजन्माच्युतदत्तं कृपया त्वयाव्यवाप्य |

# पाप विमोचन स्तोत्रम्

क्षणजीवपि कल्पगत्वबुद्धा पशुचंडालवदेव संचरामि ॥ 17 ॥
न तदस्ति शरीरिणां शताब्दायुषि शास्त्रप्रमितेपि किंचिदेव |
भगवन् खलु सर्वरात्रिकालो जलहोमोपमतामुति नालं ॥ 18 ॥
द्विदशाब्दयुगं दिवापि पूर्वोत्तरमीश स्थविरत्व शैशवाभ्यां ।
समयं प्रणयामि सर्वरोगैः बहुलीलाभिरपि प्रमूढबुद्धा ॥ 1911

परिशेषित ईश मध्यकालः सुकृते भारतभूतले वसिष्ठः |
यदिहापि सदैव पापचित्ते मयि पश्वंत्यजयोश्च को विशेषः ॥ 20 ॥

इह भारतभूतलेऽतिपुणे द्रविणस्त्री सुतपूर्वकेषु मायाम् |
अलमेकदिनं विमुच्य वा मे तव पादाब्बरतिं प्रदेहि देहि ॥ 21 ॥
रमयाप्यगणय्यवस्तु जातं द्विविधं प्राहुरमंदबुद्धिभाजः |
तव सद्गुणजातमेकमन्यन्मम दुर्वदुरंतपापजातं || 22 ||
अतिसौख्यकराण्यलं परस्तात् न हि किंचित् श्रमसाध्यसाधनानि |
श्रमभीरुरहं त्यजन्नरत्रामितशोकानुभवी कथं भवामि ॥ 23 ॥
भुवि यद्यपि पापिनो वसंति श्रमभाजः पुरुषास्तथापि कोऽपि |
मम पापसमानपापकर्ता पुरुषो नास्ति हि नास्ति नास्ति || 24 ||
नतयो न कृताः प्रदक्षिणाश्च स्तुतयोऽपि ध्रुवमंतरेण दंभः |

न गुरुः परिसेवितः सुभा शुभशास्त्राश्रवणं कथं ततः स्यात् || 25 |
वचनैर्बहुभिर्मुकुंद किं ते श्रुण मे बीजवचो वदामि तुभ्यं |
भुवनत्रयसंस्थितानि यानीश्वर पापानि वसंति मय्ययोग्य 11 26 11
प्रकृते तदघव्रजात्पमुक्तिर्नभवेरपि ते दयां विनाऽध्य |
करुणां कुरु मय्यतो मुरारे नतयस्ते कमलेश संत्वनंताः ॥ 27 ॥
विजयींद्रयतीश्वरो व्यतानीत् स्तुतिमेतां दुरितापहं मुरारेः ।
परमादरतः सदा पठेद्यो निखिलैः पापचयैर्भवेत्स मुक्तः | 28 |
|| इति श्रीविजयींद्रतीर्थ श्रीचरणकृतं पापमोचनस्तोत्रं दुरितापहारस्तोत्रं संपूर्णं ||
॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु||